# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**–आचार्य (SEM-1) | **प्रश्नपत्रम्**–४ (New & Old) | **गुणाः** – ७० |
| **विषयः** – पुराणेतिहासः | **कोड- CC- 4.1.3.** | **समयः** – २ तः ५ |
| **दिनाङ्कः** – १८/१२/२०१८ | **सन्दर्भग्रन्थः**– श्रीमद्भागवते दशमस्कन्धः (पूर्वार्धः) | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ एकस्यान्वयसन्दर्भप्रसङ्गपूर्वकं भावार्थो लेख्यः ।** **०५**

१. त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान् कर्तुमर्हसि ।
बालयोरनयोर्नृणां जन्मना ब्राह्मणो गुरुः ॥

२. येन येनावतारेण भगवान् हरिरीश्वरः ।
करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो ॥

**प्र-२ कस्याप्येकस्य सविस्तरेणोत्तरं लिखत ।** **१०**

१. पूतनावधप्रसङ्गं यथाग्रन्थं विविच्यताम् ।

२. नलकूबेरमणिग्रीवकृतभगवत्स्तुतिः निरुप्यताम् ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ एकस्यान्वयसन्दर्भप्रसङ्गपूर्वकं भावार्थो लेख्यः ।** **०५**

१. अहो ब्रह्मविदां वाचो नासत्याः सन्ति कर्हिचित् ।
गर्गो यदाह भगवानन्वभावि तथैव तत् ॥

२. किं किं न विस्मरन्तोह मायामोहितचेतसः ।
यन्मोहितं जगत्सर्वममीक्ष्णं विस्मृतात्मकम् ॥

**प्र-४ एकस्य सविस्तरमुत्तंर लिखत ।** **१०**

१. ब्रह्मणा कृता भगवत्स्तुतिः यथाग्रन्थं लिख्यताम् ।

२. वेणुगीतसारांशं यथाग्रन्थं लिखन्तु ।

**॥ तृतीयान्वितिः ॥**

**प्र-५ एकस्यान्वयसन्दर्भप्रसङ्गपूर्वकं भावार्थो लेख्यः ।** **०५**

१. पापे प्रलम्बे निहते देवाः परमनिर्वृताः ।
अभ्यवर्षन् बलं माल्यैः शशंसुः साधु साध्विति ॥

२. हेमन्ते प्रथमे मासे नन्दगोपकुमारिकाः ।
चेरुर्हविष्य भुञ्जानाः कात्यायन्यर्चनव्रतम् ॥

**प्र-६ एकस्य सविस्तरम् उत्तरं लिखत । १०**

१. भगवता कृष्णेन विप्रपत्नीकृतानुग्रहं विविच्यताम् ।

२. भगवत्कृता गोवर्धनलीला यथाग्रन्थं लिख्यताम् ।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ एकस्यान्वयसन्दर्भप्रसङ्गपूर्वकं भावार्थो लेख्यः । ०५**

१. भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥

२. पुनः पुलिनमागत्य कालिन्द्याः कृष्णभावनाः ।
समवेता जगुः कृष्णं तदागमनकाङ्क्षिणः ॥

**प्र-८ एकस्य सविस्तरम् उत्तरं लिखत । १०**

१. गोपीगीतभावार्थं यथाग्रन्थं लिखन्तु ।

२. अक्रूरकृता भगवत्स्तुतिः विविच्यताम् ।

३. युगलगीतसारं यथाग्रन्थं लिखन्तु ।

**प्र-९ दशप्रश्नानामुत्तराणि लिखत । १०**

१. दशमस्कन्धे का लीला? कति अध्यायाः?

२. वेणुगीतं कस्मिन्नध्याये आगच्छति?

३. गोपीगीतं कस्मिन् अध्याये आगच्छति ?

४. वसुदेवविवाहः कया साकमभवत्?

५. केन सह मृत्युर्जायते?

६. यशोदा - इत्यस्य शब्दस्य व्युत्पत्तिः का?

७. केषाम् आशिषः विफलाः न भवन्ति ?

८. बालकृष्णः कया बद्धः ?

९. भगवता बालकृष्णेन कयोः उद्धारः कृतः?

१०. कृष्णेन कस्य दमनं कृतम्?

११. युगलगीतं कस्मिन् अध्याये आयाति?

१२. कः बलरामकृष्णौ आनेतुं व्रजमागतः?

१३. कृष्णबलरामौ कस्य आश्रमे पठितुं गतवन्तौ?

१४. उद्धवगीतं कस्मिन् अध्याये ? कति श्लोकात्मकं वर्तते ?

१५. गोवर्धनधारणसमये कृष्णस्य वयः किमासीत्?

--००--